नं० ५४८-घ

वृत्तरत्नाकरः

पत्राणि ११

नं० ५४८

पत्रा ११

वे.मु
८८

म ऽऽऽ
य ।ऽऽ
र ऽ।ऽ
स ।।ऽ
त ऽऽ।
ज ।ऽ।
भ ऽ।।
न ।।।

श्रीगणेशायनमः सुखसंतानसिद्ध्यर्थंनत्वाब्रह्माच्युतार्चितं गौरीविनायकोपेतंशंक
रंलोकशंकरं १ वेदार्थशैवशास्त्रज्ञःपव्वेकोभूद्द्विजोत्तमः तस्यपुत्रोस्तिकेदारःशिव
पादार्चनेरतः २ तेनेदंक्रियतेछंदोलक्षलक्षणसंयुतम् वृत्तरत्नाकरंनामबाला
नांसुखबुद्धये ३ पिंगलादिभिराचार्यैर्यदुक्तंलौकिकंद्विधा मात्रावर्णविभेदेन
छंदस्तदिहकथ्यते ४ षडध्यायनिबद्धस्यछंदसोस्यपरिस्फुटं प्रमाणमपिविज्ञेयं
षट्त्रिंशदधिकंशतं ५ म्यरस्तजभ्नगैर्लांतैरेभिर्दशभिरक्षरैः समस्तंवाङ्मयंव्या राम
प्तंत्रैलोक्यमिवविष्णुना ६ सर्वगुर्मोमुखांतर्लोयरावंतगलौसतौ ग्मध्याद्यौज
भौनेष्टोभवंत्यगगणास्त्रिकाः ७ ज्ञेयाःसर्वांतमध्यादिगुरवोत्रचतुष्कलाः ग
सर्वश्च अंतश्चमध्यश्चआदिश्चसर्वांतमध्यादयः तेगुरवोयेषुतेतथोक्ताः द्वंद्वांतेश्रूयमाणत्वात्पुरुपदस्यप्रत्येकमन्वयःते
नसर्वगुरुरंतगुरुर्मध्यगुरुरादिगुरुश्चेतिचत्वारोगणाः चत्वारोलघवोयस्मिन्नुतेनयुतापंचमात्रागणाइत्यर्थः १

पादश्चेद्ध्रस्वमोग्राह्यः तदंत्यस्य लघोर्गुरुत्वं वैकल्पिकम् विषमपादांतस्य लघोस्त्वनुस्वारादिपरत्वं विना न गुरुत्वम् २
अथ गुरोरपि क्वचिल्लघुतामाह पादादौ यः संयोगः क्रमसंज्ञः तस्मिन् परतः पूर्वस्य गुरोरपि वर्णस्य लघुता तस्मात्

मात्रागणाः:
द्विगुरुः ऽऽ
अंतगुरुः ।।ऽ
मध्यगुरुः ।ऽ।
आदिगुरुः ऽ।।
सर्वलघुः ।।।।

गणाश्चतुर्लघूपेताः पंचार्य्यादिषु संस्थिताः ८ सानुस्वारो विसर्गांतो दीर्घो युक्तपरश्च यः
वा पदांते त्वसौ वक्रो ज्ञेयोन्यो मात्रिको ऋजुः ९ पादादाविह वर्णस्य संयोगः क्रमसं
ज्ञकः पुरस्थितेन तेनास्याल्लघुतापि क्वचिद्गुरोः १० इदमस्योदाहरणम् तरुणंस
र्षपशाकं नवोदनं पिच्छिलानि च दधीनि अल्पमयेन सुंदरि ग्राम्यजनो मिष्टमश्ना
ति ११ अंघ्रिभिस्तरसादीनां ज्ञेयाः संज्ञाः स्तुलोकतः ज्ञेयः पादश्चतुर्थांशो यतिर्विच्छेद
संज्ञिता १२ युक्समं विषमं चायुक्स्थानं सद्भिर्निगद्यते समम् अर्द्धसमं वृत्तं विषमं च
तथापरं १३ अंघ्रयो यस्य चत्वारस्तुल्यलक्षणलक्षिताः तच्छंदः शास्त्रतत्त्व

युक्तपरः संयोगपरः १

२ एकाक्षरमारभ्य षड्विंशत्यंतमेकाक्षरवर्द्धितैः पादैः समं वृत्तं तृतीयाध्याये पृथक् उद्धृतम् ३

वे॰मु ज्ञाः समं वृत्तं प्रचक्षते १४ प्रथमांघ्रिसमो यस्य तृतीयश्चरणो भवेत् द्वितीयस्तुर्यवद्वृत्तं
८१ तदर्द्धसममुच्यते १५ यस्य पादचतुष्कोपि लक्ष्म भिन्नं परस्परं तदाहुर्विषमं वृत्तं छं
दःशास्त्रविशारदाः १६ आरभ्यैकाक्षरात्पादादेकैकाक्षरवर्द्धितैः पृथक् छंदो भवे
त्पादैर्यावत्षड्विंशतिं गतम् १७ तदूर्ध्वं चंडवृष्ट्यादिदंडकाः परिकीर्तिताः शेषं गा
थास्त्रिभिः षड्भिश्चरणैश्चोपलक्षिताः १८ त्रिष्टुप् च जगती चैव तथातिजगती म
ता शक्करी सातिपूर्वा स्यादष्ट्यत्यष्टी ततः स्मृते १९ उक्तात्युक्ता तथा मध्या प्र राम
तिष्ठान्या सुपूर्विका गायत्र्युष्णिगनुष्टुप् च बृहती पंक्तिरेव च २० धृतिश्चातिधृ २

एकाक्षरादिषड्विंशत्यंतानां छंदसां क्रमेण संज्ञा श्लोकत्रयेणाह उक्तेत्यादिना ३ लेखकप्रमादाद्विंशतितमः श्लोकः पूर्वं लिखितः २

स्या स्तां पिंगलनागो विपुलामिति समाख्याति ४ उभयार्द्धयोर्जकारौ द्वितीयतुर्य्यौ गम
ध्यगौ यस्याः चपलेति नाम तस्याः प्रकीर्तितं नागराजेन ५ आद्यं दलं समस्तं भजेत लक्ष्म
चपलागतं यस्याः शेषे पूर्वजलक्ष्मा मुखचपला सोदिता मुनिना ६ प्राकृप्रतिपादितम
र्द्धं प्रथमे प्रथमेतरे तु चपलायाः लक्ष्माश्रयेत सोक्ता विशुद्धधीभिर्जघनचपला ७ आर्य्या
प्रथमदलोक्तं यदि कथमपि लक्षणं भवेदुभयोः दलयोः कृतयति शोभां तां गीतिं गीतवा
न्भुजंगेशः ८ आर्य्या द्वितीयकेर्द्धे यदुदितं लक्षणं तत्स्यात् यद्युभयोरपि दलयोरु
पगीतिं तां मुनिर्ब्रूते ९ आर्य्याशकलद्वितयं व्यत्ययरचितं भवेद्यस्याः सोद्गीतिः कि

छं·६

यत्र चतुर्मात्रागणाः सप्त भवंति एके न गुरुणा अष्टमस्थानीयेन सहिताश्चेत्तत्र आर्य्यायाः प्रथमे र्द्धे नियतं एवं सप्तगणानां अष्टाविंश
तिर्मात्रा अष्टमस्थानीयगुरोस्तु द्वे मात्रे एवं त्रिंशन्मात्रात्मकं पूर्वार्द्धं इह प्रथमार्द्धे विषमे विषमस्थाने प्रथमतृतीयपंचमसप्तमाख्ये द्विगु
र्वादिवन्मध्यगुरुरूपचतुर्मात्रत्वात् गणोपि जो जगणो न भवति समे तु अनियतम् २ षष्ठांशपूरणः षष्ठः अयं जगणः वा अथवा
षष्ठो न लघू द्वौ नश्च लघुश्च नलघू चतुर्लघुरूपो गणः षष्ठो देयः तथा च जगणश्चतुर्लघुर्वा नान्तर एव षष्ठ इति नियमः ४

3 तिश्चविकृतिःप्रकृतिराकृतिः विकृतिःसंकृतिरभिकृतिस्तथातिकृतिरुत्कृतिः २१ इत्युक्ता
छंदसांसंज्ञाः क्रमशोवच्मिसांप्रतं लक्षणंसर्ववृत्तानांमात्रावृत्तानुपूर्वशः २२ इ
तिभट्टकेदारविरचितेवृत्तरत्नाकरेसंज्ञाख्यानेप्रथमोध्यायः १ लक्ष्मैतत्सप्त
गणागोपेताभवतिनेहविषमेलः षष्ठोयंनलघूवाप्रथमेर्द्धेनियतमार्य्यायाः १
षष्ठेद्वितीयलात्परकेन्लेमुखलाच्चसयतिपदनियमः चरमेर्द्धेपंचमकेतस्मादिहभव
तिषष्ठोलः २ त्रिष्वंशकेषुपादोदलयोराद्येषुदृश्यतेयस्याः पथ्येतिनामतस्याःप्र
कीर्तितंनागराजेन ३ उल्लंघ्यगणत्रयमादिमंशकलयोर्द्वयोर्भवतिपादः य

अत्र प्रथमद्वयमनुवर्तते षष्ठस्थाने न्ले नगणे गुरोः लघौ विनिविधावत् इते सति चतुर्लघुसंबंधी यो द्वितीयो लघुस्तस्मात् प्रथमे पूर्वस्मिन्न
थमलघोस्सयति सविच्छेदं पदस्य नियमः समाप्तिः परके सप्तमस्थाने न्ले सति मुखलादादिलघोः प्रथमे षष्ठगणांते सविच्छेदं पदसमाप्तिरित्यर्थः ३

लेकथितानद्वयत्वंशभेदसंयुक्ता १० आर्य्यापूर्वार्द्धंयदिगुरुरेकेनाधिकेननिधनेयु
क्तं इतरत्तद्वन्निखिलंभवतियदीयमुदितेयमार्य्यागीतिः ११ षड्विषमेष्टौसमेकला
स्ताश्चसमेस्युर्नोनिरंतराः नसमात्रपराश्रिताकलावैतालीयेंतेरलौगुरुः १२ पर्य्यं
तेर्य्यौतथैवशेषमौपच्छंदसिकंसुधीभिरुक्तं आपातलिकाकथितेयंभाद्गुरुकावथ
पूर्ववदन्यत् १३ तृतीययुग्दक्षिणांतिकासमस्तपादेषुद्वितीय[illegible] उदीच्यवृत्तिर्द्वि
तीयलःसक्तोऽग्रेराभवेद्युग्मयोः पूर्वेणयुतोथपंचमःप्राच्यवृत्तिरुदितेतियुग्मयोः
यथादासमावोजयुग्मकोपूर्वयोर्भवतितत्प्रवृत्तकम् अस्ययुग्मरचितापरांतिकाश्र

वे·मु युग्मयुक्चारुहासिनी इति वैतालीयप्रकरणं वक्त्रंनाद्यान्नसौस्यातामब्धेर्योऽनुष्टुभि
८२ ख्यातम् युजोर्जेन सरिद्भर्तुः पथ्यावक्त्रंप्रकीर्तितं ओजयोर्जेन वारिधेस्तदेव विपरी
4 तादि चपलावक्त्रमयुजोर्नकारश्चेत्पयोराशेः यस्यांलः सप्तमो युग्मेसायुग्मविपुला
मता सैतवस्याखिलेष्वपि भेनाब्धितोभाद्विपुलाइत्थमन्याश्चतुर्थात् नोंबुधेश्चेन्न
विपुलातोब्धेस्तत्पूर्वान्याभवेत् इत्यनुष्टुप्प्रकरणं द्विगुणितवसुलघुरचलधृतिरि राम
तिव मात्रासमकंनवमोल्गान्तम् जोन्लावथांकवेदेर्विश्लोकः तद्युगलाद्वानवासिका ४
स्यात् वाणाष्टनवसुयदिलश्चित्रा उपचित्रानवमेपरयुक्ते ग्रन्थाभ्यो भात् ऊरावुपचित्रा १

यदतीतकृतविविधलक्ष्मयुतैर्मात्रासमादिपादैः कलितं अनियतवृत्तपरिमाणग्र
थितं जगत्सु पादाकुलकं वृत्तस्य ला विना वर्णैर्गा वर्णा गुरुभिस्तथा गुरवो लैर्दलैर्नि
त्यं प्रमाणमिति निश्चितं इति मात्रासमकप्रकरणम् शिखिगुणितदशलघुरचितमप
गतलघुयुगलमपरमिदमखिलं सगुरुसकलयुगलकमपि सुमुखि घटितललितप
दविततिर्भवति शिखा विनिमयविनिहितसकलयुगलकलितपदविततिरचितगु
णनिचया श्रुतिसुखकृदियमपि भवति जगति निजशिरउपगतवनितमति भवति ख
ञ्जा अष्टावंशगा प्रथमस्तायस्याः सानंगक्रीडोक्ता दलमपरमपि वसुगुणितसलिलघु
निखिललघुकविरचितपदविततिर्भवति त्रिगुणनवलघुरवसितिगुरुरिति दलघु
गलकृततनुरतिरुचिरा इति श्रीभट्टकेदारविरचिते वृत्तरत्नाकरे द्वितीयोऽध्यायः २.

उक्थायांगुः श्रीः अत्युक्थायांगौस्त्रीमध्यायां मोनारी रोमृगीप्रतिष्ठायाम् म्सौचेत्क
वृ·र·र न्या सुप्रतिष्ठायां भौगितिपंक्तिः गायत्र्यांतौतनुमध्याशशिवदनान्यौसोचेद्व
५ सुमतीविद्युल्लेखामोमः उष्णिहिम् सौगः स्यान्मदलेखा कुमारललिताज्सौगः सृ
5 गौर्हंसमाला अनुष्टुभिभौगितिचित्रपदागः मोमोगोगोविद्युन्माला माणवकंभा
त्तलगाः म्नौगौहंसरुतमेतत् जासमानिकागलौच प्रमाणिकाजरौलगौ विता
नमाभ्यांयदन्यत् नाराचकंतरौलगौ वृहत्याम् रान्नसाविहहलमुखी पंक्तौम्सौ
ज्गौशुद्धविराडिदं म्नौजौचेतिपणवनामकम् ज्यौत्गौमयूरसारिणीस्यात् भ्मौ ५३
सगयुक्तौरुक्मवतीयम् मत्ताज्ञेयामभसगयुक्ता नरजगैर्भवेन्मनोरमा ज्यौजौ छ·१
गुरुणेयमुपस्थितात्रिष्टुभिः स्यादिंद्रवज्रातभजाजगौगः उपेंद्रवज्राजतजा

स्ततोगो अनंतरोदीरितलक्ष्मभाजौपादौयदीयावुपजातयस्ता इत्थंकिलान्या
स्वपिमिश्रितासुस्मरंतिजातिष्विदमेवनाम एकत्रपादेचरणद्वयेवापादत्रयेवा
न्यतरस्थितश्चेत् तयोरिहान्यत्रतदोह्नीयाश्चतुर्दशोक्ताउपजातयस्ता नजज
लगौगदितासुमुखी दोधकवृत्तमिदंभभभाद्गौ शालिन्युक्तामौतगौगोब्धिलो
कैः वातोर्मीयंकथितामौभतौगः भौन्सौगःस्याद्भ्रमरविलसितं रान्नराविह
रथोद्धतालगौस्वागतेतिरनभाद्गुरुयुग्मम् ननसगगुरुरचितावला ननरल
गुरुभिश्चभद्रिका श्येनिकारजौरलौगुरुर्यदा मौक्तिकमालायदिभतनाद्गौ उप
स्थितमिदंजसौताद्गकारौ पंचवसैःश्रीर्नेतनगौगैःस्यात् जगतसा चंद्रवर्त्मनिगदं

वे·मु तिरनभसैः जतौ तु वंशस्थमुदीरितं जरौ स्यादिंद्रवंशा ततजैरसंयुतौ इह तोटकमंबु
८८ धिसैः प्रथितं द्रुतविलंबितमाह नभौ भरौ वसुयुगविरतिर्नौ म्यौ पुटोयं प्रमुदितवदना
6 भवेन्नौ च रौ नयसहितौ न्यौ कुसुमविचित्रा रसैर्जसजसा जलोद्धतगतिः भुजंगप्रयातं भ
वेद्यैश्चतुर्भिः रैश्चतुर्भिर्युता स्रग्विणी संमता मुनिभवेन्नभजैरैः प्रियंवदा त्यौ त्यौ मणिमा
ला छिन्ना गुहवक्त्रैः धीरैरभाणि ललिता तभौ जरौ प्रमिताक्षरा सजससैरुदिता ननभर
सहिता महितोज्ज्वला पंचाश्वैश्छिन्ना वैश्वदेवी ममौ यौ अब्ध्यष्टाभिर्जलधरमाला म्भौ स्मौ राम
इह नवमालिका नजभयैः स्यात् स्वरशरविरतिर्ननौ रौ प्रभा भवति नजावथ मालती जरौ न ६
युगरयुगायुक्चगौरीमता अभिनवतामरसं नजजाद्यपंचमुनिभ्नोमात्सयुता ललना ॥

ललितमभिहितं नौ म्लौ नाम तः द्रुतपदं नभजौ यैः कथितं स्यात् अतिजगत्याम् वेदै रंध्रै
र्म्नौ यसं गा मत्तमयूरम् यमौ रौ विरामा ता चंचरीकावली गः चतुर्ग्रहैरतिरुचिरा जभौ सजगाः
तुरगरसयतिर्नो जतौ गः क्षमा सजसा जगौ भवति मंजुभाषिणी ननतरगुरुभिश्चंद्रिका चतु
र्भिः म्तौ य्गौ ग स्त्रिदशपतिः प्रहर्षिणीयम् शक्वर्याम् म्नौ न्सौ गौ वक्षयग्रहैर्विरतिरसंबाधा न
नरसलघुगैः स्वरैरपराजिता ननभनलगिति प्रहरणकलिका उक्ता वसंततिलका तभजा ज
गौ गः सिंहोन्नतेयमुदिता मुनिकाश्यपेन उद्धर्षिणीयमुदिता मुनिसैतवेन रामेणसेयमु
दिता मधुमाधवीति इंदुवदना भजसनैः सगुरुयुग्मैः द्विः सप्तच्छिदेलोला म्सौ म्गौ गो चर
णो चेत् अतिशक्वर्याम् द्विकृतहयलघुरथगिति शशिकला स्रगिति भवति रसनवकयतिरि

वे॰मु यम् वसुहयपतिरिहमणिगुणनिकरः ननमयययुतेयंमालिनीभोगिलोकैः भवतिन
१०० जौभजौरसहितौप्रभद्रकम् सजसानयेश्वरदशयतिरियमेला म्रौम्यौयांतौभवेतांसप्ताष्टकैश्चंद्र
7 लेखा अष्ट्याम् म्रौत्रिनगाःस्वरात्स्वमृषभगजविलसितम् नजभजैरैःसदाभवतिवाणिनीगयु
क्तैः लघुर्गुरुनिरंतरंयदासपंचचामरम् पंचभकारयुतास्वगतिर्यदिचांतगुरुः अत्यष्ट्याम् र
सैरुद्रैश्छिन्नायमनसभलागःशिखरिणी जसौजसयलावसुग्रहयतिश्चपृथ्वीगुरुः दिङ्मुनिवं
शपत्रपतितंभरनभनलगैः रसयुगहयैन्सौम्रौस्लौगोयदाहरिणीतदा मंदाक्रांताजलधिषडगैर्म्भौ राम
नतौताद्गुरूचेत् रसदशभिर्नजौभजजलागुरुनर्कुटकम् मुनिगुहकार्णवैःकृतयतिंवदकोकिल ७
कम् धृत्याम् स्याद्भूतत्वाश्वैःकुसुमितलतावेल्लिताम्तौनयौयौ मात्सौजौभरसंयुतौकरिवाणकैर्हरि

वे·मु गात्कृतम् यदि हनयुगलं ततो वेदरेफा महामालिका पंचभकारकृताश्वगतिर्यदि चांतसनिरता
८६ अतिधृत्याम् नयुगगुरुलघुनिरंतरं यदा स पंचचामरः रसर्त्वश्वैर्यौम्नौ स्रौ रगुरुयुता मेघविस्फूर्जि
तास्यात् सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितं धृत्याम् ज्ञेयाः सप्ताश्वषड्भिर्मर
भनययुता भ्लौ गः सुवदना नीरजो मलौ भवेदिहेदृशेन लक्षणेन वृत्तनाम धृत्याम् अभ्रै
र्यानां त्रयेण त्रिमुनिपतियुता स्रग्धरा कीर्तितेयम् प्रकृत्याम् भोनरनारनावथ गुरुर्दिग
र्कविरमं हि भद्रकमिदम् विकृत्याम् यदिह नजौ भजौ भलगास्तदाश्वललितं हरार्कपतितम्
मत्ताक्रीडा मौ त्नौ नौ न्लौ गिति भवति वसुशरदशशरयुता संकृत्याम् भूतमुनीनैर्यतिरिह
भतनाः स्भौ भनयाश्च यदि भवति तन्वी अतिकृत्याम् क्रौंचपदा भ्मौ स्मौ ननना न्गाविषुशर

वसुमुनिविरतिरिहभवेत् उत्कलमालाम् वर्ष्मीशास्त्रश्रेष्ठे दोषे तं समतनयुगनरसलगैर्भुजंगविजृं
४ भितं मोनाःषड्सगागिति यदि नवरसरसशरयतियुतमपवाहाख्यम् यदिहनयुगलंततसप्त
रेफास्तदाचंडवृष्टिप्रपातोभवेद्दंडकः प्रतिचरणविवृद्धरेफैः स्युरर्णार्णवव्यालजीमूतलीलाक
रोद्दामशंखादयः प्रचितकसमभिधोधीरधीभिः स्मृतोदंडकोनद्वयादुत्तरैःसप्तभिर्यैः इतिश्री
भट्टकेदारविरचितेवृत्तरत्नाकरेसमवृत्ताभिधानस्तृतीयोध्यायः ३ विषमेयदिसौसलगादले
भौजुजिभाद्गुरुकावुपचित्रम् १ भत्रयमोजगतंगुरुणीचेत् युजिचनजौज्यगुरूतोद्रुतमध्या २ राम
सयुगात्सगुरू विषमेचेत् भाविहवेगवतीयुजिभाद्गौ ३ ओजेतपौरजौगुरुश्चेत् म्सौज्गौ ८
भद्रविराड्भवेदनोजे ४ असमेसजौसगुरुयुक्तौकेतुमतीसमेभरनगाद्गुः ५ आख्यानकी

तौजगुरूजगमोजेजतावनोजेजगुरूगुरुश्चेत् ६ अतौजगौगोविषमेसमेस्यात् तौजौ
गाऽऽख्याविपरीतपूर्वा ७ सयुगात्सलघूविषमेगुरुर्युजिनभौचभरौहरिणप्लुता अयुजिन
नरलागुरुःसमेनजमपरवक्त्रमिदंततोजरौ ९ अयुजिनयुगरेफतोयकारोयुजिचनजौजर
गाश्चपुष्पिताग्रा १० वदंत्यपरवक्त्राख्यंवैतालीयंविपश्चितः पुष्पिताग्राभिधंकेचिदौपच्छं
दसिकंयथा ११ विषमेससजागुरूसमेचेत्सभरायश्चवसंतमालिकासा १२ स्यादयुग्मकेर
जौरजौसमेचजरौजरौ गुरुर्य्यवात्सरामतीयम् १२ इतिचतुर्थोऽध्यायः मुखपादोऽष्टभिर्व
र्णैःपरेस्युर्मकरालयैःक्रमाद्वृद्धाः सततंयस्यविचित्रैःपादैःसंपन्नसौंदर्य्यं तदुदितममलम
तिभिःपदचतुरूर्द्ध्वाभिधंवृत्तम् प्रथममुदितवृत्तैर्विरचितविषमचरणाभाजिगुरुकयुगल

वे·मु निधनगुरुसहितमाद्या लघुविरचितपदविततियतिरितिभवतिपीडः प्रथममितरचरणमनु
८४ संश्रयतिसयदिलक्ष्म द्रुतरचितरगादितमपियदिचसमस्तं चरणयुगलकमविहृतमपरमिति
१ कलिकासा द्विगुरुयुतसकलचरणानामुर्वचरणगतमनुभवति च तृतीयंचरणमिहहिलक्ष्म
प्रहृतमखिलमपियदिदमनुभवतिलवलीसा प्रथममधिवसतियदितुर्यंचरमचरणपदमव
सितिगुरुयुग्मम् अखिलमपरमुपरिगतमितिललितयुक्तातदिदममृतधारा सजसादिमे
सलघुकौच नसजगुरुकैरथोद्गताङ्घ्रिगतभनजलागयुताः सजसाजगौ चरणमेकतः पठे राम
त् चरणत्रयंव्रजतिलक्ष्मयदिसकलमुद्गतागतैर्भिगोभवतिसौरभकंचरणोयदीरभवौत ८
स्तृतीयके नयुगंसकारयुगलंचभवतिचरणेतृतीयके ननुदितमुरुमतिभिर्ललितंयदिशेष

मस्य खलु पूर्वं तुल्यत्वं इत्युक्तत्वात्प्रकरणं मेसोजभौजौ प्रथमांघ्रिरेकतः पृथगन्यत् त्रितयं रो
नजरगास्ततो ननौ सः त्रिनपदिकलितं तयोः प्रचुपितमिदमुदितमुपस्थितपूर्वम् नोपादेः
षत्तृतीयके सनौ नसयुक्तौ प्रथमांघ्रिस्तत्पतिस्तु वर्द्धमानम् त्रितयमपरमपि पूर्ववत्सह
शमिह भवति प्रवरमतिभिरिति गदितं लघुवृत्तम् अस्मिन्नेव तृतीयके पदात जरास्तुः
प्रथमे च विरतिः शार्षभं ब्रुवंति तत्तच्छुद्धविराट्पूर्वस्थितं त्रितयमपरमपि यदि पूर्ववत्समस्या
त् इत्युपस्थितप्रचुपितप्रकरणं विषमाक्षरपादं वा पादैरसमं दशधर्मवत् यच्छंदो
ज्ञोक्रमत्रगाथेति तत्सूरिभिः ओंक्रमदशधर्मं न जानंति धूर्तास्तु निबोधतान् मत्तः
प्रमत्तउन्मत्तः श्रांतः क्रुद्धो बुभुक्षितः त्वरमाणश्च भीरुश्च लुब्धः कामी च ते दश इति श्रीम्

वे.मु इकेदारविरचितेवृत्तरत्नाकरेपंचमोध्यायः प्रस्तारोनष्टमुद्दिष्टमेकद्व्यादिलग
८८ क्रिया संख्यानमध्वयोगश्चषडेतेप्रत्ययाःस्मृताः १ पादेसर्वगुरावाद्याल्लघुंन्यस्य
10 गुरोरधः यथोपरितथाशेषंभूयःकुर्यादमुंविधिं २ ऊनेदद्याद्गुरूनेवयावत्सर्वेलघु
र्भवेत् प्रस्तारोयंसमाख्यातश्छंदोविचितवेदिभिः ३ नष्टस्ययोभवेदंकस्तस्यार्द्धेर्द्धेस
मेचलः विषमेचैकमाधायतदर्द्धेर्द्धेगुरुर्भवेत् ४ उद्दिष्टंद्विगुणानाद्यादुपर्य्यंकान्स
मालिखेत् लघुस्थायेतुतत्रांकास्तैःसैकैर्मिश्रितैर्भवेत् ५ वर्णान्वृत्तभवान्सैकानौ। राम ९०
त्तराधर्य्यतःस्थितान् एकादिक्रमतश्चैतानुपर्युपरिविन्यसेत् ६ उपांत्यतोनिवर्तेतत्य

जन्ते कैकमूर्द्धतः उपर्य्याधाकुरोरेवमेक आदिलगक्रिया ७ लगक्रियांकसंदोहे भवेत्सं
ख्याविमिश्रिते उद्दिष्टांकसमाहारः सैकोवाजसनेयिनाम् ८ अथवांतिमवर्णांकमुद्दि
ष्टेद्विगुणांकुरु इतिप्रकारांतरम् संख्येवद्विगुणोलोकोनामद्भिरध्यायकीर्तितः वृत्तस्यांगुल
कीव्याप्तिमधः कुर्य्यात्तथांगुलिं ९ वंशेभूत्कश्यपस्यप्रकटगुणगणः शैवसिद्धांतवेत्ता
विप्रःपव्वेकनामाविमलतरमतिर्वेदशास्त्रार्थवेत्ता केदारस्तस्यसूनुःशिवचरणयुगारा
धनैकाग्रचित्तश्छंदसोनाभिरामंप्रविरचितमिदं वृत्तरत्नाकराख्यम् ❀ इतिश्रीभट्ट
केदारविरचितेवृत्तरत्नाकरेषष्ठोध्यायः ६ संवत् १८८८ जंबूनगरेकामदेवार्थेलिखितम्

वृत्तरत्नाकर